# Gaurashankaravivahavarnanam

# ગૌરાશઙ્કરવિવાહવર્ણનમ્

## Document Information

Text title : Gaurashankaravivahavarnanam

File name : gaurAshankaravivAhavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | adhyAyaH 18 gaurAshaNkaravivAhaH | 13-57 ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

# ગૌરાશઙ્કરવિવાહવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

(સ્કન્દપ્રોક્તમ્)

॥ ૧ । દેવૈઃ કૃતા ગણેશસ્તુતિઃ ॥

દેવા ઊચુઃ ।

પાશાઙ્કુશકરાસક્તમોદકં વિઘ્નનોદકમ્ ॥ ૧૩॥

બોધકં સર્વશાસ્ત્રાણાં ભજામો વિઘ્નનાશકમ્ ॥ ૧૪॥

વેતણ્ડગણ્ડં શશિખણ્ડસૂનું
દાનોદગણ્ડં નતદેવષણ્ડમ્ ।
સ્વભક્તવિઘ્નાર્તિહરપ્રચણ્ડં
નમામ્ખણ્ડં સુરહસ્તિચણ્ડમ્ ॥ ૧૫॥

નાકિનાયકનતાબ્જપાદુકં
વિઘ્નનાશવિનાયકં ભજે ।
વિષ્ણુસાયકસુભક્તિદાયકં
પ્રણમતાદ્ય સુરા ગણનાયકમ્ ॥ ૧૬॥

હૃદન્તર્વિભાન્તં ધિયં ચોદયન્તં
ઉમાકાન્તમોદપ્રદં સત્સુદન્તમ્ ।
પ્રશાન્તં સુદાન્તં હસન્તં નદન્તં
વસન્તં મુદા તં ભજામ્યેકદન્તમ્ ॥ ૧૭
(પ્રશાન્તં સુદાન્તં નદન્તં હૃદન્ત-
ર્વસન્તં મુદા તં ભજામ્યેકદન્તમ્) ॥ ૧૭॥

સુરાવનં સુપાવનં નમજ્જનાર્તિનાશનં
સતાં હૃદેકવાસિનં ભજે મતઙ્ગજાનનમ્ ।

સનાતનં નિરઞ્જનં ફલાદિસારભોજનં
સ્વભક્તવિઘ્નનાશનં ભજે મતઙ્ગજાનનમ્ ॥ ૧૮॥

ચરાતરાદિકારણં સ્વભક્તપાપહારિણં
ભવામ્બુધેઃ સુતારણં પ્રશાન્તકામપૂરણમ્ ।
ગજાનનપ્રસાદનં પઠન્તિ યે મનીષિણઃ
ન તે ભવન્તિ દુઃખિતાનના ગણેશશાસનાત્ ॥ ૧૯॥

॥ ૨ । મહાદેવસ્ય વેદિપ્રવેશવર્ણનમ્॥

વેદિં પ્રવેશયામાસ મહાદેવં સુરૈઃ સહ ।
રત્નસિંહ્માસને દિવ્યે સંસ્થાપ્ય પરમેશ્વરમ્ ॥ ૨૧॥

પાદૌ પ્રક્ષાલ્ય દેવસ્ય રત્નભૃઙ્ગારજૈર્જલૈઃ ।
મેનાકરાન્તનિર્યાતૈઃ સમ્પ્રોક્ષ્યાથ સ્વામૌલિષુ ॥ ૨૨॥

બ્રહ્મવિષ્ણ્વાદિવિબુધાઃ કૃતાર્થા ગિરિણા સહ ।
તત્રાહ વિષ્ણુર્દેવેશો બ્રહ્માણં તં વિલોકયન્ ॥ ૨૩॥

ભવાનહં સમુત્પન્નૌ દેવસ્ય ભુજયોઃ પુરા ।
લલાટતટતો રુદ્રઃ સુરા મુનિગણૈઃ સહ ॥ ૨૪॥

એષા હૈમવતી ગૌરી માયા સા પરમેષ્ઠિનઃ ।
સઞ્જાનન્ લોકસિધ્યર્થમુદ્વાહાર્થમિહાગતઃ ॥ ૨૫॥

ભવોઽસૌ જગતાં ધાતા પિતા તવ મમાપિ ચ ।
માતા દેવી સદાઽસ્માકં યયોરુદ્વાહમઙ્ગલમ્ ॥ ૨૬॥

પશ્યામો ધન્યનેત્રાભ્યાં વિમુક્તભવબન્ધનાઃ ।
અસ્યૈવ મૂર્તિભિર્વ્યાપ્તં જગત્સર્વં ચરાચરમ્ ॥ ૨૭॥

ક્ષિત્યમ્બ્વગ્ન્યનિલાકાશસૂર્યેન્દ્વાત્મા ચ દીક્ષિતઃ ।
મહાદેવો મહાનાત્મા સ્વતન્ત્રઃ સર્વહૃદ્ગતઃ ॥ ૨૮॥

તદા સ ગિરિરાટ્ તત્ર મેનયાઽપૂજયદ્ધરમ્ ।
મધુપર્કેણ વિધિના પુષ્પૈર્ગન્ધૈર્મનોરમૈઃ ॥ ૨૯॥

ધૂપૈર્દીપૈશ્ચ નૈવેદ્યૈર્વાસોઽલઙ્કારભૂષણૈઃ ।
ગામર્ઘ્યં શમ્ભવે દત્વા તામનુજ્ઞાપ્ય શઙ્કરઃ ॥ ૩૦॥

સંસ્થિતઃ સુરસઙ્ઘૈશ્ચ ગણૈર્વીજિતચામરઃ ।

નદત્સુ દેવતૂર્યેષુ ગાયત્સુ સુમનોહરમ્ ॥ ૩૧॥

કીર્યમાણેષુ પુષ્પેષુ સાક્ષતેષુ સભાઙ્ગણે ।
સદસ્યેષુ સુરેન્દ્રેષુ ગણેષુ ચ મહત્સુ ચ ॥ ૩૨॥

ગર્ગોદિતે શુભે લગ્ને ગિરિરાટ્ મેનયા તદા ।
ગિરિજાં સમલઙ્કૃત્ય વિમલાં વરભૂષણૈઃ ॥ ૩૩॥

સમાનીય મહાદેવીં તદા પ્રત્યઙ્મુખસ્થિતામ્ ।
વીજિતાં ચામરૈસ્તત્ર સખીભિઃ સંવૃતાં શિવામ્ ॥ ૩૪॥

મધ્યેપટધરાવાસ્તાં તદા શઙ્કહરી મુદા ।
સુરાઃ સાર્દ્રાક્ષતાહસ્તાસ્તસ્થુઃ પ્રાઞ્જલયો ગણાઃ ॥ ૩૫॥

સ્તિમિતે વાદ્યઘોષે ચ જેપુસ્તત્ર મહર્ષયઃ ।
વસિષ્ઠો વામદેવશ્ચ ગૌતમોઽત્રિર્ભૃગુસ્તથા ॥ ૩૬॥

જમદગ્નિઃ કાશ્યપશ્ચ ભરદ્વાજો મહર્ષયઃ ।
પ્રત્યેકં મઙ્ગલં પદ્યં પઠન્તિ સ્મ શિવોત્સવે ॥ ૩૭॥

॥ ૩ । ઋષિભિઃપ્રોક્તં મઙ્ગલપાઠઃ॥

વસિષ્ઠ ઉવાચ ।

મૌર્વીમૂર્ધ્નિરથઃ શરાસનશિરઃસઞ્ચારિચક્રદ્વયં
ચક્રાન્તર્નિહિતઃ શરસ્તદુદરે સૂતસ્તદાસ્યે હયાઃ ।
તેષામેવ શિરઃસુ દેવવસતિર્યસ્યેતિ યસ્યશ્રુતં
દેવાશ્ચિત્રપરિચ્છદઃ સ ભગવાન્ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૩૮॥

વામદેવ ઉવાચ ।

યો દેવઃ શ્રુતિશેખરેષુ વિદિતો યં ભાસકં જાનતે
યેન ભ્રામ્યતિ લોકજાલમખિલં યસ્મૈ નમસ્કુર્વતે ।
યસ્માન્નાપરમસ્તિ કિઞ્ચિદપિ વૈ યસ્યાઙ્ગમેતજ્જગત્
યસ્મિંસ્તિષ્ઠતિ સર્વમેવ ભુવનં કુર્યાત્સદા(સ મે)મઙ્ગલમ્ ॥ ૩૯॥

ગૌતમ ઉવાચ ।

વિશ્વાત્મા ભગવાન્ ચરાચરતનુર્વિશ્વાત્મકોઽયં શિવો
વેદાન્તપ્રથિરુવૈભવપદો નિઃશ્વાસવેદો હરઃ ।
યો ગૌરીરમણોઽત્ર નિર્જરવરો વિશ્વપ્રકાશાત્મકો

વિધ્વસ્તાખિલભક્તપાતકકુલઃ કુર્યાત્સ મે મઙ્ગલમ્ ॥ ૪૦॥

અત્રિરુવાચ ।

યં દેવા ન હિ જાનતે પુરહરં શમ્ભું ભવાનીપતિં
વિશ્વાત્માનમનન્તવિષ્ણુવિધિભિઃ સંસેવ્યપાદામ્બુજમ્ ।
તં સર્વાદિગુરું મનોજવપુષં ગૌરીવિવાહોત્સુકં
વન્દે તચ્ચરણામ્બુજન્મયુગલં કુર્યાત્સદામઙ્ગલમ્ ॥ ૪૧॥

ભૃગુરુવાચ ।

યદ્ભીત્યા પવતેઽનિલોઽપિ સહસા વિશ્વોદયસ્થો રવિઃ
અગ્નિશ્ચોર્ધ્વશિખો ભવત્યનુદિનં શક્રઃ સુરાન્ પાતિ વૈ ।
મૃત્યુર્ધાવતિ યદ્ભયેન સુતરાં મૃત્યુઞ્જયસ્યાજ્ઞયા
યં સામ્બં હૃદયે ભજન્તિ મુનયઃ સોઽયં શિવાયાસ્તુ નઃ ॥ ૪૨॥

જમદગ્નિરુવાચ ।

યો વિષ્ણોર્જનિતા સુરાસુરગુરુર્વેદાન્તવેદ્યો હરો
યત્પાદામ્બુજપૂજનેન જગતી ધન્યા કૃતાર્થાઽભવત્ ।
ધન્યોઽયં ગિરિરાજરાજતિલકઃ સત્પાત્રકન્યાર્પણાત્
નાન્યં જાનથ શઙ્કરાત્ સુરવરાઃ કુર્યાત્સ વો મઙ્ગલમ્ ॥ ૪૩॥

કાશ્યપ ઉવાચ ।

સેવાર્થાગતવિઘ્નરાટ્ગુહલસદ્વાહેક્ષણાભ્યુત્થ ત-
ત્પ્રત્યાયાત ભુજઙ્ગફૂત્કૃતિકનદ્ભાલાગ્નિકીલોત્કરૈઃ ।
ઇન્દુસ્યન્દિસુધોપજીવિતકરિવ્યાઘ્રાદિનાદાર્ભટી-
ભીતાક્ષાવનતત્પરાગિરિસુતાકાન્તેક્ષણાન્મઙ્ગલમ્ ॥ ૪૪॥

ભરદ્વાજ ઉવાચ ।

કારુણ્યામૃતસારપૂરિતલસન્નેત્રાન્તસંવીક્ષણ-
ત્રૈલોક્યાવનદીક્ષિતં જપવટીરાજત્કરામ્ભોરુહમ્ ।
સામ્બં નિર્જરદીર્ઘિકાપ્રવિલસત્સમ્ફુલ્લપદ્માવલી-
ધૂલીધૂસરકર્બુરોજ્જ્વલજટારેખં ભજે શ્રેયસે ॥ ૪૫॥

ઇત્થં મઙ્ગલવાક્યાનિ પ્રયુઞ્જાના મહર્ષયઃ ।

॥ ૪ । શિવશિવાપાણિગ્રહણવર્ણનમ્॥

અક્ષતાન્ વ્યકિરન્ ગૌરીશઙ્કરોપરિ સાદરમ્ ॥ ૪૬॥

તત્રાભિવીક્ષ્ય રતિમેવ સુદુઃખિતાં તા-
મમ્બામુદૈક્ષત શિવઃ સ્મરસમ્પ્રદાને ।
સા શર્વવક્ત્રમભિવીક્ષ્ય દયાન્તરઙ્ગા
ચક્રેઽઙ્ગસઙ્ગિનમનઙ્ગં મપાઙ્ગપાતૈઃ ॥ ૪૭॥

અજોઽપિ લાજૈર્વરવહ્નિમૌલૌ
જુહાવ મન્ત્રૈર્મુનિવર્યજુષ્ટઃ ।
સ્વચારુવક્ત્રૈઃ શશિખણ્ડભૂષણં
વિલોક્ય નૈત્રૈર્મુદમાપ વિસ્મિતઃ ॥ ૪૮॥

દદૌ સ ભૃઙ્ગારિકધારયા સમં
સ મેનયા ભૂધરનાયકઃ કરે ।
હરસ્ય હસ્તાબ્જતલે ભવાન્યાઃ
પાણિં દદત્પાત્રમહો બભૂવ ॥ ૪૯॥

સુરાસ્તદોચુર્મુનયો ગિરીશ્વરં
ધન્યો હિ માન્યો હરપાત્રદાતા ।
પ્રતિગ્રહીતાપિ મહેશ્વરઃ સ્વયં
ધન્યા કિલૈષા જગતાં જનિત્રી ॥ ૫૦॥

પાણિગ્રહે પર્વતરાજપુત્ર્યાઃ
પાદામ્બુજં પાણિસરોરુહાભ્યામ્ ।
અશ્માનમારોપયતઃ સ્મરારે-
ર્મન્દસ્મિતં મઙ્ગલમાતનોતુ ॥ ૫૧॥

પ્રદક્ષિણાવર્તશિખં હિ વહ્નિં
બિભ્યન્તં એનં ક્રમણેન તૌ શિવૌ ।
પરીત્ય શેષં વિધિના સમાપ્ય
મુદા તદા તસ્થતુરેવ હર્ષિતૌ ॥ ૫૨॥

નીરાજ્ય ગૌરીસહિતં મહેશ્વરં
મેના તદા સા પ્રણનામ હૃષ્ટા ।
ગિરીશ્વરશ્ચાપિ તદાદિદમ્પતી
નનામ હૃષ્ટો ગિરિવર્યજુષ્ટઃ ॥ ૫૩॥

તામ્બૂલવિશ્રાણનગન્ધપુષ્પૈઃ
સુરાસુરાન્ ભૂધરનાયકાંશ્ચ ।
ચકાર પૂજાભિરતીવ હૃષ્ટાન્
તુષ્ટાન્તરઙ્ગોઽથ શિવાજ્ઞયા હરિઃ ॥ ૫૪॥

ગોભૂહિરણ્યં કનકામ્બરં વસુ
દ્વિજેષુ સર્વર્ષિષુ શઙ્કરાજ્ઞયા ।
વિશ્રાણકો વૈશ્રવણો મુદાઽભૂત્
તદા શિવાયાઃ સુવિવાહમઙ્ગલે ॥ ૫૫॥

રુદ્રં હરિદ્રાઙ્ગમુમા ચકાર
સા ન્યસ્તતન્દ્રાપિ સુચન્દ્રશેખરમ્ ।
તદાદ્રિપત્ની ગણગીતમન્ત્રૈઃ
સુચન્દનાર્દ્ર પટવાસભૂષિતમ્ ॥ ૫૬॥

હરોઽપિ દેવ્યા વિજહાર હર્ષિત-
શ્ચકાર પુષ્પૈઃ સહકારપૂજામ્ ॥ ૫૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ગૌરાશઙ્કરવિવાહવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । અધ્યાયઃ ૧૮ ગૌરાશઙ્કરવિવાહઃ । ૧૩-૫૭ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . adhyAyaH 18 gaurAshankaravivAhaH . 13-57 ..

Notes:

.. 1 . Devaiḥ Kṝtā GaṇeśaStutiḥ..
॥ ૧ । દેવૈઃ કૃતા ગણેશસ્તુતિઃ ॥

Deva-s દેવાઃ eulogize Gaṇeśa ગણેશ upon being instructed by Śiva શિવ to do so as He reaches the gates of the abode of Himācala હિમાચલ, for the Ceremony of Pāṇigrahaṇa પાણિગ્રહણ of Pārvatī પાર્વતી.

.. 2 . Mahādevasya VedipraveśaVarṇanam..
॥ ૨ । મહાદેવસ્ય વેદિપ્રવેશવર્ણનમ્ ॥

Mahādeva મહાદેવ makes entry into the Vedi વેદિ where the procedure of Pāṇigrahaṇa પાણિગ્રહણ would be conducted. Mahādevī મહાદેવી is escorted to the Vedi વેદિ in due course amidst a musical ambience.

.. 3 . ṚṣibhiḥProktaṁ MaṅgalaPāṭhaḥ..
॥ ૩ । ઋષિભિઃપ્રોક્તં મઙ્ગલપાઠઃ ॥

Ṛṣi-s ઋષયઃ individually recite the MaṅgalaPāṭhaḥ મઙ્ગલપાઠઃ ahead of the Pāṇigrahaṇa પાણિગ્રહણ ceremony.

.. 4 . ŚivaŚivāPāṇigrahaṇaVarṇanam..
॥ ૪ । શિવશિવાપાણિગ્રહણવર્ણનમ્ ॥

Pāṇigrahaṇa પાણિગ્રહણ ceremony of Mahādeva મહાદેવ and Mahādevī મહાદેવી comes to be to the delight of everyone present.

Proofread by Ruma Dewan

---

*Gaurashankaravivahavarnanam*

pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*